# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## अच्सन्धौ प्रकृतिभावः (१)

# ९०. प्लुतप्रगृह्या अचि नित्यम् (६.१.१२५)

- पदत्रयम् ।
- प्लुतप्रगृह्याः, अचि, नित्यम् ।
- ‘प्रकृत्यान्तः पादमव्यपरे’ (६.१.११५) इत्यतः ‘प्रकृत्या’ इति अनुवर्तते ।
- प्लुताः प्रगृह्याश्च वक्ष्यन्ते, ते अचि परे नित्यं प्रकृत्या स्युः।
- प्लुतः – एहि कृष्ण(३), अत्र गौश्चरति।
- प्रगृह्यम् – हरी एतौ।

- नित्यम् इति किम् ?
- हरी एतौ इत्यादौ अयमेव प्रकृतिभावो यथा स्यात्, 'इकोऽसवर्णे...' इति ह्रस्वसमुच्चितो मा भूत् ।

# ९१. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (६.१.१२७)

- पञ्च पदानि ।
- इकः, असवर्णे, शाकल्यस्य, ह्रस्वः, च ।
- ‘एङः पदान्तादति’ (६.१.१०९) इत्यतः ‘पदान्ताद्’ इति अनुवर्तते । ‘प्लुतप्रगृह्या...’ (६.१.१२५) इत्यतः ‘अचि’ इति अनुवर्तते । ‘प्रकृत्यान्तः पादमव्यपरे’ (६.१.११५) इत्यतः ‘प्रकृत्या’ इति अनुवर्तते ।
- पदान्ता इकः असवर्णे अचि परे प्रकृत्या स्युः, ह्रस्वश्च वा ।

- चक्री + अत्र = चक्रि अत्र / चक्र्यत्र
- अत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थः चकारः न कर्तव्यः  इति भाष्ये स्थितम् ।

- पदान्ताः इति किम्?
- गौरी + औ = गौर्यौ ।

# न समासे (वा)

- समासे उक्तः शाकल्यविधिः न भवति ।
- वाप्याम् अश्वः = वापी + अश्वः  = वाप्यश्वः ।

# सिति च (वा)

- सिति परे शाकल्यविधिः न भवति ।
- पर्शूनां समूहः
- पर्शु + णस्  (पर्श्वा णस् वक्तव्यः)
- पर्शु    अ    (चुटू, हलन्त्यम्, तस्य लोपः)
- पार्शु    अ    (तद्धितेष्वचामादेः)
- पार्श्व    (इको यणचि)

# १२. ऋत्यकः (६.१.१२८)

- पदद्वयम् ।
- ऋति, अकः ।
- ‘एङः पदान्तादति’ (६.१.१०९) इत्यतः ‘पदान्ताद्’ इति, ‘प्रकृत्यान्तः पादमव्यपरे’ (६.१.११५) इत्यतः ‘प्रकृत्या’ इति, ‘इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च’ (६.१.१२७) इत्यतः ‘शाकल्यस्य’ इति, ‘ह्रस्वश्च’ इति च अनुवर्तते।
- ऋति परे अकः प्राग्वत् ।
- ऋकारे परे अकः प्रकृत्या स्युः, ह्रस्वश्च वा इत्यर्थः ।

ब्रह्मा + ऋषिः = ब्रह्म ऋषिः / ब्रह्मर्षिः ।

‘पदान्ताः’ इत्येव ।

आ + ऋच्छति = आर्च्छत् (‘आटश्च’ ६.१.९०) इति वृद्धिः ।

समासेऽप्ययं प्रकृतिभावः ।

सप्त च ते ऋषयः च (द्विगुसमासः)

सप्त + ऋषीणाम् = सप्त ऋषीणाम् / सप्तर्षीणाम् ।

# १३. वाक्यस्य टेः प्लुत उदात्तः (८.२.८२)

- चत्वारि पदानि ।
- इत्यधिकृत्य ।
- ८.२.९८ पर्यन्तमधिकारः ।

# १४. प्रत्यभिवादेऽशूद्रे (८.२.८३)

- पदद्वयम् ।
- प्रत्यभिवादे, अशूद्रे ।
- ‘वाक्यस्य टेः प्लुत उदात्तः’ (८.२.८२) इत्यधिक्रियते ।
- अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात्, स च उदात्तः ।
- अभिवादये देवदत्तोऽहम्, आयुष्मान् भव देवदत्त (३) ।
- अभिवादये विष्णुशर्माऽहम्, आयुष्मान् भव विष्णुशर्म(३)न् ।

# स्त्रियां न (वा)

- स्त्रीविषयकप्रत्यभिवादविषये प्लुतो न भवति ।
- अभिवादये गार्ग्यहम् । आयुष्मती भव गार्गि ।

- नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते ।
- नेह – आयुष्मानेधि ।

# भोराजन्यविशां वेति वाच्यम् (वा)

- आयुष्मानेधि भोः(३) ।
- आयुष्मानेधीन्द्रवर्म(३)न् ।
- आयुष्मानेधीन्द्रपालित (३) ।